ह० रि० अंतःकरणस्यवापरिणामविशेषः ज्ञेयं वियदादिवस्तुतद्रहितोपि अविद्याद्युपहितः सन्सदाज्ञः ज्ञातासवेति
९ वेद्यंनचतस्यास्तिवेत्तेत्यादिश्रुतेरित्यर्थः तस्माज्जगतोमिथ्यात्वाद्ब्रह्मणोजगत्कारणत्वमवास्तवं तटस्थंतदु
३२ पलक्षणं नतुविशेषणमितिसिद्धं ४ एवंकेवलतार्किकानवग्राह्यं श्रौतंजगत्कारणंविष्णुंस्तुत्वाइदानींभक्त्या
दिसाधनसंपन्नैर्गुरूपमुमुक्षवापरायणैरेवावग्राह्यंतत्वंस्तोतुमारभते आचार्यैति आचार्येभ्योलब्धसुसूक्ष्मा
च्युततत्वावैराग्येणाभ्यासबलाच्चैवदृढिम्ना भक्त्येकाग्र्यध्यानपरायंविदुरीसंततंसंसारध्वांतविनाशंहरि
मीडे ५ यमीशंविदुःसाक्षादनुभवंतिततमितिसंबंधः कीदृशाअधिकारिणोविदुस्तत्राह आचार्येभ्यइ
ति करतलामलकवत्सम्यक्प्रत्यक्षीकृतब्रह्मतत्वेभ्यः सर्वकर्मसंन्यासेनसमिदाद्युपहारपूर्वकंविधिव
त्स्वैरूपसन्नेभ्यः शांतेभ्यः केवलंशिष्यकृपयैवतद्बोधनेप्रवर्तमानेभ्योगुरुभ्यः सकाशाल्लब्धं प्रथ
मंज्ञातंसुसूक्ष्मं अच्युतस्य च्युतिरहितस्यकूटस्थनित्यश्रीविष्णोस्तत्वं येस्तेलब्धसुसूक्ष्माच्युततत्वाआ
ना चार्यवान्पुरुषोवेद तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं नैषातर्केणमतिरा
पनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठ इत्यादिश्रुतेः हेप्रेष्ठनचिकेतः एषा ब्रह्मविषयामतिस्तर्केण स्वक
तर्केनमूलप्रमाणरहितेनआपनेया प्रापणीयानभवति किंतुअन्येनसर्वज्ञेनगुरुणाप्रोक्ता प्रकर्षेणयु
क्तिदृष्टांतपूर्वकंउक्ताउपदिष्टासतिस्वज्ञानाय सम्यग्ब्रह्मविषयाविद्यानिवर्त्तयेभवति इतिश्रुतेर
र्थः तद्विद्धिप्रणिपातेनेत्यादिस्मृतेश्च प्रथमज्ञातेनसाकल्येनासंभावनानिवृत्त्यसंभवेपिश्रवणसाधनांतरम
ख

नास्ति एकमेवाद्वितीयं यस्मात्परं नापरमस्ति किंचिदित्यादिश्रुतेरित्यर्थः अनुमानस्य दीर्घविस्तरतन्त्रोमह
[illegible] व्यभिचारादागमबाधितत्वाच्चेति भावः ब्रह्म परमार्थतो जगदाकारेण परिणमत इति भास्करम
तमाशंक्य निराकरोति अपि नैवं परमार्थमिति एवं वियदादि जगदाकारेणावस्थानं परमार्थं न वास्तवमित्य
र्थः निष्कलं निष्क्रियमित्यादिश्रुत्या निरवयवब्रह्मणोंऽशतो जगद्रूपपरिणामानुपपत्तेः सर्वात्मना च परि
णामे ब्रह्माभावप्रसंगात्पुनः प्रलयकाले सच्चिदानंदाकारेण परिणामे च ब्रह्मणो नित्यत्वप्रसंगात्समुद्रादेश्च
सावयवत्वेनांशतः फेनादिपरिणामे व्यवस्थितिसंभवाच्च न ब्रह्मणो जगदाकारेणावस्थानं वास्तवं सूत्र
कारोपि कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति परिणामवाद मदूषयत् स्पष्टोऽर्थः तदनन्यत्वमारंभण
शब्दादिभ्य इति विवर्तवादं चांगीकार तदनन्यत्वं परमार्थतः प्रपंचस्य तद्व्यतिरेकेणाभाव आरंभणश
ब्दादिभ्यः वाचारंभणं विकारो नामधेयमित्यादिश्रुतिभ्य इति तस्यार्थः ततो जगतो मिथ्यात्वान्न जगत्कारणत्वेन सूत्रार्थ
ब्रह्मणो वास्तवमिति भावः ननु सर्वैः परिदृश्यमानस्य जगतः कथं मिथ्यात्वं दृश्यत्वादेव शुक्तिरूप्यादिव
ज्जगतो मिथ्यात्वमिति चेत्तर्हि ब्रह्मणोपि दृश्यत्वान्मिथ्यात्वापत्तिरित्याशंक्याह दृश्याद्न्य इति दृश्याच्चेतन्य
विषयादन्यो योविद्वुरिति शेषः अदृष्टो द्रष्टेत्यादिश्रुतेरित्यर्थः दृश्याद्न्यत्वे हेतुमाह निर्विषयज्ञानमय
त्वादिति विषयानपेक्षविज्ञानस्वभावत्वात् इत्यर्थः विज्ञानघन इति श्रुतेः कूटस्थज्ञानमात्रस्वरूपस्य क
थं सर्वज्ञत्वमित्याशंक्याह ज्ञातृज्ञानेत्यादिना ज्ञातृज्ञानज्ञेयविहीनोपि ज्ञाता ज्ञानाश्रयः ज्ञानमविद्यायां बाधव
ज्ञेत्यक्तमोवि [illegible] प्रमातेषां विहीनोपि

ह०रि चितमंतः करणं हृदि हृदयाकाशे ब्रह्मणि रुध्वा निरुध्य ॐमित्यात्मानंयुंजीत ॐमित्येवं ध्यायथा आत्मा
१० नमितिश्रुतेः आत्मनिचित्तंयुंजीतनिरुंध्यादित्यर्थः ॐमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् इत्यादिस्मृते
श्च अथवा ॐमितिउच्चमाने ओंकारवाच्ये हृदि हृदयाकाशे चित्तंरुध्वा अन्यत्रूपरसादीनस्मृत्वाप्राप्त
मपिविसयस्मृतिंविषयदोषदर्शनेनहित्वा संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः मनसैवेंद्रियग्रा
मंविनियम्यसमंततः शनैःशनैरुपरमेद्बुध्याधृतिगृहीतया आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंत
येत् यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ततस्ततोनियम्यैतदात्मन्येववशंनयेत इतीश्वरस्मृतेःपुनः
पश्चात्तदूत्तस्मीत्यभ्यासयेदयं चित्तं अत्रैव ब्रह्मात्मन्येव विलाप्यविलयंप्राप्य चित्तेक्षीणेलीनेसतिध्यान
व्यापारादुपरतेसति आहशिरस्मीति स्वप्रकाशश्चिद्रूपः परमात्मास्मीति यं विद्वांसुविदुरित्यर्थः तदुक्तंभा
रतीतीर्थैः निर्गुणोपासनंपक्वं समाधिस्याच्छनैस्ततः यः समाधिनिरोधाख्यः सोनायासेन लभ्यतेनिरोध
लाभेपुंसोंतरसंगवस्तुशिष्यते पुनःपुनर्वासितेस्मिन्वाक्याज्जायतेतत्वधीरिति श्रुतिश्च यछेद्वाङमन भावनाह्वे ते
सिप्राज्ञस्तद्यछेत्ज्ञानआत्मनि ज्ञानमात्मनिमहतितद्यछेत्शांतआत्मनीति अस्यचायमर्थः प्राज्ञो
विवेकीमुमुक्षुःपुरुषः वाकवाचंमनसिनियछेत्निरुध्यात् वागग्रहणं सर्वेषामिंद्रियाणामुपलक्षणंच
एवंवागादींद्रियव्यापारंविहायमनोमात्रव्यापारेणअवतिष्ठेतेत्यर्थः तन्मनःज्ञानआत्मनिदेहेंद्रियादिव्या
पारसाक्षिणिचित्प्रकाशेआत्मनिपछेतमनादिस्वात्मबुद्धिंविहाय तत्साक्षिचेतन्यएवात्मबुद्धिंकुर्यादित्य १०

प्याह वैराग्येणेत्यादिना वैराग्येण विषयदोषविवेकेनोत्पन्नेन ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मत इत्युक्त
पराकाष्ठामापन्नेन विषयविक्षेपरहितं कृतो योनिरंतरोऽभ्यासः श्रवणवृत्तिः तेन पद्द्वलं मननं तेनैव ल्पेन निष्ठा मननेन
स्येदित्यत्र तथैव व्याख्यानात् ताभ्यां दृढिम्ना सुदृढया भक्त्याहं ब्रह्मास्मीत्येकत्वेनया भक्तिर्भजनं तया एकाग्र
ध्यानपराः प्रत्यगभिन्नब्रह्मैकविषयध्याननिष्ठाः संतोयं विदुरित्यर्थः नायमात्मा प्रवचनेन लभ्यो न मे
धया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा वृणुते तनुं स्वां नायमात्मा बलहीनेन लभ्य
स्ततस्तु तं पश्यति निष्कलं ध्यायमानः इति मांडूकश्रुतेः प्रवचनमध्ययनं मेधा ग्रंथार्थधारणसामर्थ्यं
श्रुतमनात्मविषयं बहुधा विविहितं एतैर्न लभ्यः किंतु एष साधको यं परमात्मानमेव श्रवणादिभिर्निरंत
रं प्रार्थियते तेनायमात्मा लभ्यः तस्यैवं प्रार्थयमानस्यैष आत्मा स्वां तनुं सच्चिदानंदात्मिकां वृणुते प्रका
शयतीत्यर्थः बलहीनेन तद्विषयमननमकुर्वाणेनेत्यर्थः निष्कलं निरवयवं परमानंदं निरंतरं ध्याय
घ्नीतीति यंत्या मानः प्रत्ययसंतत्या विषयीकुर्वन् पुरुषः तत एव ध्यानात्तं पश्यति अप्रतिबंधेन साक्षात्करोतीत्यर्थः
तदुक्तं भगवतापि अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वत इति
एकाग्रध्यानपरा विदुरित्युक्तं केन क्रमेण केन प्रकारेण च ते विदुरित्याकांक्षायामाह प्राणानिति प्राणाना
यम्योमिति चित्तं हृदि रुद्ध्वा नान्यत्स्मृत्वा त्पुनरत्रैव विलाप्य क्षीणे चित्ते भादृशि रस्मीति विदुर्यं तं संसार
ध्वांतविनाशं हरिमीडे ६ प्राणान् वागादीन्द्रियाणि आयम्य उपसंहृत्य अनंतरमोमिति जपं न एवं चि

ह०रि श्रवणादिभिर्युक्तं नियतं आत्मचैतन्ये यामित्यर्थः अजं जन्मरहितं महानजइत्यादिश्रुतेः सूक्ष्मं इंद्रिया
११ ग्राह्यं सूक्ष्मात् सूक्ष्मतरं इत्यादिश्रुतेः अतर्क्यं केवलतर्कागम्यं किंतु उपनिषद्गम्यं तं त्वौपनिषदमित्या
दिश्रुतेः आत्मस्थं आत्मनि कार्यकारणसंघाते जीवत्वेन प्रविश्य स्थितं तदेवानुप्राविशत् अनेन जीवे
न आत्मनानुप्रविश्येत्यादिश्रुतेः एवंभूतं विष्णुं ध्यात्वा ब्रह्मविदो भवंति यं च हृत्स्थं सर्वप्राणिनां हृदयं त
र्यामितया स्थितमीशं विदुः तत्र श्रुतिः अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्ये
त्यादिना हृदयोपाधिना अंगुष्ठमात्रः स्वतः पुरुषः पूर्णः मध्ये देहमध्ये आत्मनि हृदये त्यर्थः ७ एवं
उ तावद्ब्रह्मत्यादिसाधनसंपन्नैरेवावग्राह्यं तत्त्वं स्तुत्वा अधुना तत्त्वंपदार्थविवेकसंपन्नैरेवावग्राह्यं विष्णुं
स्तोतुमुपक्रमते मात्रातीतं इति मात्रातीतं स्वात्मविकाशात्मविबोधं ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यं
भावग्राह्यानंदमनन्यं च विदुर्यं स्तं संसारध्वांतविनाशं हरिमीडे ८ मीयंते अर्था आभिरिति मात्राश्च
क्षुरादयस्ता अत्येतीतं चक्षुराद्यग्राह्यमित्यर्थः अत्र श्रुतिः न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा
कर्मणा वा इति अन्यैर्वाक्चक्षुर्भ्यां मिंद्रियैस्तपसा कृच्छ्रचांद्रायणादिना कर्मणा अग्निष्टोमादिना च न
गृह्यते ज्ञातुं न शक्यते रूपजात्यादिराहित्यादित्यर्थः तर्हि चक्षुरादिना अग्रहणात् नास्त्येवेति न वा
च्यमित्याह स्वात्मविकाशात्मविबोधमिति स्वस्य प्रतीच आत्मा स्वरूपं तस्याधिकाशो भिव्यक्तिर्यस्य त अँस्करणस त
स्मिन्नात्मनि अंतःकरणे स्विबोधो विशेषबोधो यस्य स तथोक्तः तर्हि बुद्धिग्राह्यमिति प्राप्ते नेत्याह ते

र्थः तदुक्तमाचार्यैः सत्यानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहं चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां धियं इति
ज्ञानं मनआदिसाक्षि चेतन्यं च महति देशकालादिपरिच्छेदशून्ये आत्मनि ब्रह्मणि नियच्छेत् निरुध्यात् एकीकु
र्यादित्यर्थः तं तं महांतं आत्मानं साक्षित्वब्रह्मत्वविकल्पत्यागपूर्वकं शांते सर्वव्यापारातीते अन्यत्र धर्माद
न्यत्राधर्मादित्यादिना प्रशांते आत्मनि नियच्छेत् अहं ब्रह्मास्मीति वृत्त्युदये स्वं त्यक्त्वा स्वतःप्रकाशमानपरमा
नंदपरिपूर्णब्रह्मात्मना अवतिष्ठेतेत्यर्थः तदुक्तं दर्शनादर्शने हित्वा स्वयं केवलरूपतः यस्तिष्ठति स तु ब्रह्म
न् ब्रह्म न ब्रह्मवित्स्वयमिति पराशरेण ६ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः तं परमात्मानं विज्ञाय
विशेषेण ज्ञात्वा धीरः धीमान् विषयानाकृष्य चित्तो वा प्रज्ञां प्रत्ययसंततिं कुर्यात् अनन्याश्चिंतयंतो मां ये ज
नाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना इत्या
दिश्रुतिस्मृतयोरपि इममर्थं वदंतीत्याह यमिति यं ब्रह्माख्यं देवमनन्यं परिपूर्णं कृत्स्नं भक्त्यैव लभ्यमजस्र
हृदयसत्त्वं ध्यात्वात्मस्थं ब्रह्मविदो यं विदुरीशं तं संसारध्वांतविनाशं हरिमीडे ७ देवं स्वप्रकाशं अत्रायं पुरु
षः स्वयं ज्योतिरिति श्रुतेः अनन्यं अन्यद्वस्तु शून्यं यस्मात्परं नापरमिति श्रुतेः परिपूर्णं परितः सर्वेषु
देशेषु कालेषु च वर्तमानं ब्रह्मैवेदममृतं पुरस्तात्पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतमिति श्रु
स्वस्तने ष्ठ तेः स एवाधस्तात् स उपरिष्टात् इत्यादिश्रुतेश्च अत एव त्रिविधपरिच्छेदशून्यतया ब्रह्माख्यं ब्रह्मेत्याख्या अभिधा यस्य तं भ
क्त्यैव निरंतरं श्रवणादिना आत्मानं जनः मानैः पुरुषैर्लभ्यं प्राप्यं तं सर्वगतं प्राप्य धीरा युक्तात्मान इति श्रुतेः

पश्यान

ह०रि० भवतीत्यादिना स्वयंज्योतिष्ट्वेन असंगो ह्ययं पुरुषः इत्यादिना च असंगत्वेन यद्वै तन्न पश्यतीत्यादिना अलुप्त
१२ चिद्रूपत्वेन प्रतिपाद्यमानं त्वंपदार्थं अक्षुपलभ्यं यं विदुरिति संबंधः तत्पदार्थमाह भावग्राह्यानंदमिति भाव
चैतन्य रूपेण ग्राह्यश्चासावानंदश्चासौ भावग्राह्यानंदस्तं युवा स्यात् साधु युवाध्यायकः इत्यादिना सार्वभौ
म्यमुपक्रम्य मनुष्यगंधर्वादिस्थानेषूत्कर्षेण श्रूयमाणः आनंदः यत्र कष्टतां प्राप्तः सोऽस्ति निरति
शयानंदः यतो वाचो निवर्तंते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति वाङ्म
नसागोचरब्रह्मत्वेन श्रूयमाण इत्येवं भावग्राह्यानंदमित्यर्थः अनन्यं अन्यत् द्वितीयं यस्मान्न सो
नन्यः तमद्वितीयं निरतिशयानंदं तत्पदार्थमित्यर्थः ननु ब्रह्मणोऽनन्यत्वं कथं द्वितीयस्यान्यस्य
घटपटादेरनुभावादित्याशंक्य सर्वस्यापि द्वितीयस्य दृश्यत्वेन शुक्तिरजतादिवद्ब्रह्मण्यस्मिन्नारोपितत्वा आत्मनि
त् आरोपितस्य च परमार्थभूताधिष्ठानमात्रत्वात् सर्वं खल्विदं ब्रह्म आत्मैवेदं सर्वं ब्रह्मैवेदं स
र्वं इदं सर्वं यदयमात्मा पुरुष एवेदं सर्वं विश्वमित्यादिश्रुतेश्च न ब्रह्मणोऽनन्यपदोक्ताद्वितीयत्व
क्षतिरित्यभिप्रेत्याह यद्यदिति यद्यद्दृश्यं वस्तु सतत्वं विषयाख्यं तत्तद्ब्रह्मैवेति विदित्वा तं तदहं च
ध्यायं स्वेवं यं सनकाद्या मुनयो जन्तुसंसारध्वंतविनाशं हरिमीडे ९ यद्यद्विषयाख्यं विशणोति
विशेषेणापुलकं च घ्नातीति विषयः शब्दादिः तद्विषयाख्यं वस्तु सत्तत्वं वस्तु परमार्थभूतं ब्रह्मैव

नहिदृश्यादृष्टो भवति

यातीतमिति ज्ञेयं ज्ञानविषयं वस्तु अतीत्य वर्तमानं नहि ज्ञेयातीतं ज्ञेयं भवति अन्यदेव तद्विदितात् अप्रमेयमनादिं चेत्यादिश्रुतेः विदितात् वेदनविषयात् अप्रमेयं प्रमायाः बुद्धिवृत्तेर्विषयो न भवतीत्यर्थः अत्र हेतुमाह ज्ञानरूपमिति ज्ञानस्वरूपत्वादित्यर्थः सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेः ननु तर्हि ज्ञेयातीतस्य कथमन्तःकरणे विशेषबोधः इत्याशंक्याह बुद्ध्युपलभ्यमिति बुद्धिवृत्तौ भास्यातीतस्यापि सूर्यस्य आदर्शे स्फुटं प्रतिबिंबतया भानवत् ज्ञेयातीतस्यापि बुद्धेर्बुद्धौ स्फुटं प्रतिबिंबितया स्वतः स्फुरणं संभवति तथा चश्रुतिः मनसैवेदमाप्तव्यं एषोऽणुरात्मा चेतसा वेदितव्यः दृश्यते त्वग्र्यया बुद्ध्येत्यादिना न चैतेषु वाक्येषु आत्मनो बुद्धिग्राह्यत्वं प्रतीयते इति वाच्यं अप्राप्य मनसा सह न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीया यन्मनसा न मनुते येनाहुर्मनो मतमित्यादिश्रुतिविरोधप्रसंगात् कस्तर्हि श्रुतिद्वयस्य परस्पराविरोधार्थ इति चेत् शृणु मनसैवेदमाप्तव्यमित्यादिनात्मनो वृत्तिव्याप्यत्वं विविहितं अप्रमेयमित्यादिश्रुत्या फलव्याप्यत्वं निषिध्यते आत्मनो वृत्तिव्याप्यत्वं नाम अन्तःकरणवृत्तौ प्रतिबिंबततया स्वत एव स्फुटं भासमानत्वं फलव्याप्यत्वं फलेन तज्जन्यचिदाभासेन भास्यत्वं तथा च न श्रुतिद्वयविरोधः तदुक्तं भारतीतीर्थैः स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुतेति अतो विषयस्यापि बोधः संभवतीति भावः योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इत्याद्यवान्तरवाक्येन देहादिव्यतिरिक्तत्वेन अत्रायं पुरुषः स्वयंज्योति

आदि सदत निषेधाते? आत्मनः माहावाक्यान्तरेण

नाम वृत्ति गतः

वृत्तिव्याप्यत्वं अंगीक्रियते

बुधित्वा झिकः प्राणा

सुसुप्तिअवस्थाया

द०टि स्मीत्यात्मविद् अस्मीत्यात्मवेदनं कुर्वतः यमीशं ईशपदलक्ष्यं ब्रह्मविदुः साक्षादनुभवंतीत्यर्थः त्वंपदलक्ष्यज्ञा
१३ नं विना तस्य ब्रह्मत्वपरिज्ञानासंभवादिति भावः तथा च श्रुतिः त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो अन्य
विलक्षणः साक्षी चिन्मात्रोहं सदाशिव अत्र हि श्रुतौ भोग्यस्थूलप्रविविक्तआनंदेभ्यो भोक्तृविश्वतैजसप्रा
भ्य ज्ञेभ्यः उपाधियुक्तेभ्यो विलक्षणः सर्वस्य भासको यश्चिन्मात्रोहं पदलक्ष्य इत्यहंपदलक्ष्यं साक्षात्कृतम
नूद्य तस्य सदाशिवशब्दलक्ष्याद्वयानंदब्रह्मत्वं बोध्यते त्वंपदलक्ष्यार्थमसाक्षात्कुर्वतस्तस्य ब्रह्मत्वसाक्षात्का
रासंभवात् २० ननु एवं देहादिविलक्षणमात्मानं तस्य ब्रह्मत्वं च जानतामपि केषांचिन्मुक्त्यभावः पुरैरपि न
देहादावात्मबुद्धिश्च दृश्यतेऽतो देहादिव्यतिरिक्तात्मज्ञानं निःफलं इत्याशंक्य तेषामप्रतिबंधात्मज्ञानाभावादे
व मुक्त्यभावादिति न तु ज्ञानस्य तदसाधनत्वेन प्रतिबंधश्चासत्यप्रपंचानात्मदेहादिषु सत्यत्वात्मबुद्धिः पूर्व
पूर्ववासनया प्राप्ता प्रपंचदेहादिषु असत्यत्वानात्मत्वभावनया आत्मनश्चिद्रूपत्वभावनया च दीर्घकालेनैरंतर्ये
सत्काराभ्यस्तया निवर्तते निवृत्ते तस्मिन् ज्ञानेनैर्ज्ञानेनैव देहे सर्वे ब्रह्मैव भवंतीत्याशयेनाह हित्वेति हित्वा
हित्वा दृश्यमशेषं विकल्पं मत्वा शिष्टं भादृशिमात्रं गगनाभं त्यक्त्वा देहं यं प्रविशंत्यच्युतभक्तास्तं संसारध्वं ॥
दृश्यं दृशोगोचरं सविकल्पं घटत्वपटत्वब्राह्मणत्वादिविकल्पसहितं सर्वमेव बाह्यमभ्यंतरं च प्रपंचं हि
त्वा असत्वेनानात्मत्वेन च भावनया निरस्य देहादेरनात्मत्वं जगतो मिथ्यात्वं वा संचिंतेत्यर्थः तदुक्तं भारतीतीर्
थैः आत्मदेहादिभिन्नोयं मिथ्या चेदं जगत्तयोः देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावनात्मभावनयान

सतत्वस्वरूपंयस्यसतद्वस्तुसंतत्वंतस्मिन्विषयाख्यस्यसर्वस्यारोपितत्वादित्यर्थः तत्रहेतुमभिप्रायेणाह वेद्यमिति
द्व्या वेद्यंदृश्यत्वात् तस्मिन्नारोपितत्वेनविषयाख्यवस्तुसतत्वमित्यर्थः अतस्तद्ब्रह्मैवनततोतिरिक्तमितिविदित्वाज्ञा
त्वाज्ञात्वा नद्ब्रह्माहंचकाराद्यत्ययेनाहंब्रह्मेतिच एवंउक्तप्रकारेण यमजंपरमात्मानंहरिंसनकाद्याः सनकस
नंदनसनत्कुमारसनातनप्रभृतयः मुनयमननशीलाःध्यायंतितंहरिंईडे ९ ननुअहंप्रत्ययविषयआत्मा
प्रसिद्धः तस्यकथंज्ञेयातीतत्वसंभावानेत्याशंक्याह यद्यद्वेद्यमिति यद्यद्वेद्यंतत्तदहंनेतिविहायस्वात्मज्योति
र्ज्ञानमयानंदमवाप्य तस्मिन्नस्मीत्यात्मविदोयंविदुरीशंतंसंसारध्वांतविनाशंहरिमीडे १० यद्यद्वेद्यंदेहा
द्यहंकारपर्यंतं तत्तदहंआत्मानभवामीतिविहायत्यक्त्वा वेद्यस्यचघटादिवदनात्मत्वेनव्याप्यत्वात् अहंकारा
दिचवेद्यत्वात्आत्मानभवतीतिहित्वेत्यर्थः अयंभावः आत्माअहंप्रत्ययविषयइतिवदन्वादीप्रष्टव्यः कि
मात्मस्वरूपाहंप्रत्ययविषयः उतआत्मनिष्ठाहंप्रत्ययविषयः नाद्यः स्वस्यस्वकर्मत्वानुपपत्तेः द्वितीयेपि
किमात्मनिष्ठप्रत्ययोजडः उतस्वप्रकाशः नाद्यः जडेनात्मभानानुपपत्तेः नद्वितीयः स्वप्रकाशप्रत्ययविषय
स्यघटादिवदात्मत्वायोगात् नच स्वप्रकाशप्रत्ययस्याधारतयैवविषयत्वमंतरेणात्माभासतेइति वाच्यं प्रत्य
यव्यतिरिक्तस्यप्रत्ययाधीनप्रकाशस्यप्रत्ययविषयत्वनियमेनात्मनोऽनात्मत्वदोषतादवस्थ्यात् तस्माद्योयः प्र
त्ययविषयोहंकारादिर्देहांतः सः सोनात्मेति स्वात्मेति स्वात्माज्योतिर्ज्ञानमयानंदंस्वात्मज्योतिः स्वप्रकाशो
ज्ञानमयः ज्ञानस्वरूपोयः आनंदः तंअवाप्यपरमप्रेमास्पदत्वेनसंभाव्यतस्मिन्संभाविते अहंपदलक्ष्येअ
२ किंच यद्यद्वेद्यंतत्तत्स्वविलक्षणंवेद्यमितिव्याप्तिदर्शनात्स्वप्रकाशआत्मेतिनिश्चीयते इत्याह २

स्वप्रकाशात्मनोहविषयः २

ह०रि अंतरोयंपृथिवीनवेदयस्यपृथ्वीशरीरं यःपृथिवीमंतरोयमयति एषतआत्मांतर्याम्यमृतइति एवमेव
१४ योप्सुतिष्ठन्योग्नेर्योतरिक्षेयोदिवियआदित्यइत्याद्यनेकपर्यायैः सर्वांतर्यामीविष्णुर्निरूपतः तस्याश्च
तेरयमर्थः यःपृथिव्यांतिष्ठतिसोंतर्यामीकिंघटपटादिनेत्याह पृथिव्याअंतरःकिमंतवर्त्तमानापृथिवीदेव
तानेत्याह यंपृथिवीदेवतानवेदसोंतर्यामीपृथिवीदेवताहिस्वात्मानंनजानातिइयमहस्मीति तस्मान्नसा
किंशरीरीसःनेत्याहः यस्यपृथिवीशरीरमिति यस्यपृथिव्येवशरीरंनियम्यशरीरातिरिक्तंशरीरंनास्तीत्य
श्री र्थः एवंअयंतरोवर्तमानःपृथिवी पृथिवीदेवतांयमयतिस्वव्यापारेप्रेरयति एषोमृतःकूटस्थोनित्योंत
र्यामीहेउद्दालकतेआत्मेति एवंसर्वपर्यायेष्वर्थोद्रष्टव्यः एवंब्रह्मवित्सभायांसर्वांतर्यामित्वेनसिद्धंवि
ष्णुंस्तौतिसर्ववेत्तेति सर्वत्रास्तेसर्वशरीरीनचसर्वःसर्वंवेत्त्यवेदनयंवेतिहिसर्वं सर्वांतर्यामितेयेत्यं
यमयत्यसं १२ यःसर्वत्रपृथिव्यादिषूपादानतयाआस्तेतंतुपटइवसर्वंशरीरंयस्यससर्वशरीरीयश्च
नसर्वःकिंतुअधिष्ठानतयासर्वस्यांतरःयश्चेहपृथिव्यादौस्थितःसर्वंवेत्तिजानातियंचसर्वंपृथिव्यादिन
वेदःसर्ववेत्तिवेद्यंनचतस्यास्तिवेत्तेत्यादिश्रुतेः वेदाहंसमतीतानिवर्तमानानिचार्जुन भविष्याणिचभू
तानिमांतुवेदनकश्चनेतिस्मृतेश्च यःयमयन् पृथिव्यादिप्रेरयन्विहितप्रतिषिद्धेषुप्रवर्तयन् निवर्त
यंश्च इत्थंउक्तप्रकारेणसर्वांतर्यामितयावर्ततेतेमित्यर्थः तथाचोक्तं जनामिधर्मंनचमेप्रवृत्तिर्जानाम्य
धर्मंनचमेनिवृत्तिः केनापिदेवेनहृदिस्थितेनयथानियुक्तोस्मितथाकरोमि ईश्वरःसर्वभूतानांहृद्देशे

विपर्ययभावनांशेषं

शेषंसोतोदेहादिभिन्नत्वात्मनोभावयेत्तद्वन्मिथ्यात्वंजगतोनिशामेति शिष्टं परिशिष्टंमाहशिमात्रंस्वप्र
काशचिन्मात्रंस्वच्छत्वासंगत्वविभुत्वादिभिर्गगनोपमंमत्वाआत्मत्वेनज्ञात्वा तदुक्तंविद्यारण्यगुरुभिः पंच
कोशपरित्यागेसाक्षिबोधावशेषतः स्वस्वरूपंसएवस्यात्शून्यत्वंतस्यदुर्घटमिति ततः देहंत्यक्त्वाआत्म
निश्चयंकृत्वा त्वेना ऽभिमत्येयंविद्वांसुप्रविशंतितत्रप्रवेशस्तादात्म्यतयावस्थानमेवमुख्यप्रवेशस्यासंभवात् ब्रह्मवित्ब्र
ह्मैवभवतीत्यादिश्रुतेः अच्युतभक्ताः अच्युतेच्युतिरहितेअविनाशिनिब्रह्मणिआत्मत्वेनयाभक्तिर्भज
नंतद्युक्ताइत्यर्थः अथयोऽन्यांदेवतामुपास्तेअन्योसावन्योहमस्मीतिनसवेदेत्यादिश्रुतेः ९१ अस्तिहिबृह
दारण्यकेपंचमाध्यायेआख्यायिकाजनकोहवैदेहोबहुदक्षिणंयज्ञमारभतेतत्रच नानादेशेभ्योब्राह्मणाः ब्र
ह्मविदोयज्ञदिदृक्षयाधनादिलिप्सयाचसमागताः अभिसंगताबभूवुः तत्रचब्रह्मविसंघदर्शनेनजन
कस्यजिज्ञासाबभूव सचतेषांब्रह्मविदांब्रह्मिष्ठंपुरुषंज्ञातुंउपसंपद्यतलंततोज्ञास्यामीतिमत्वागोगवां
सहस्रंस्वर्णरत्नादिभिः सर्वतोलंकृतंब्रह्मवित्सभायामवरुध्यतानुवाचहेभगवंतोब्राह्मणायोवोब्रह्मिष्ठस्त
स्माएतद्गोसहस्रंमयादत्तमितितेचभीतास्तूष्णींस्थिता अथयाज्ञवल्क्यः तूष्णींभूतान्ब्राह्मणानालक्ष्यस्वांतेवा
सिनमुवाच एतागाः अस्मद्गृहंनयेति सतथाचकार तद्दृष्ट्वाब्राह्मणाश्चुक्रुधुः क्रुद्धेषुहोताश्वलः आर्तभा
गोभुज्युर्लाह्यायनिरुषस्तः कहोल इत्येतेब्रह्मविदोयाज्ञवल्क्येनसद्यः पराजिताः अथोद्दालिकेनस्वशि
ष्णअंतर्यामिणंपृष्टोयाज्ञवल्क्यः उद्दालिकंयांतर्यामिणमुवाच साचश्रुतिरेषा यः पृथिव्यांतिष्ठन्पृथिव्यां